श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री शङ्कराचार्य विरचितम्

# ॥ श्री हनुमद्भुजङ्गप्रयातस्तोत्रम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri. Sundar Varadarajan of California for proofreading this document.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्री हनुमद्भुजङ्गप्रयात स्तोत्रम् ॥

प्रपन्नानुरागं प्रभाकाञ्चनाभं
जगद्भीतिशौर्यं तुषाराद्रिधैर्यम्।
तृणीभूतहेतिं रणोद्यद्विभूतिं
भजे वायुपुत्रं पवित्राप्तमित्रम्॥ १ ॥

भजे पावनं भावनानित्यवासं
भजे बालभानु प्रभाचारुभासम्।
भजे चन्द्रिकाकुन्द मन्दारहासं
भजे सन्ततं रामभूपाल दासम्॥ २ ॥

भजे लक्ष्मणप्राणरक्षातिदक्षं
भजे तोषितानेक गीर्वाणपक्षम्।
भजे घोरसङ्ग्राम सीमाहताक्षं
भजे रामनामाति सम्प्राप्तरक्षम्॥ ३ ॥

कृताभीलनादं क्षितिक्षिप्तपादं
घनक्रान्त भृङ्गं कटिस्थोरु जङ्घम्।
वियद्व्याप्तकेशं भुजाश्लेषिताश्मं
जयश्री समेतं भजे रामदूतम्॥ ४ ॥

चलद्वालघातं भ्रमच्चक्रवालं
कठोराट्टहासं प्रभिन्नाब्जजाण्डम्।
महासिंहनादा द्विशीर्णत्रिलोकं
भजे चाञ्जनेयं प्रभुं वज्रकायम्॥ ५ ॥

रणे भीषणे मेघनादे सनादे
सरोषे समारोपिते मित्रमुख्ये।

खगानां घनानां सुराणां च मार्गे
　　नटन्तं वहन्तं हनूमन्त मीडे॥ ६ ॥

कनद्रत्न जम्भारि दम्भोलिधारं
　　कनद्दन्त निर्धूतकालोग्र दन्तम्।
पदाघातभीताब्धि भूतादिवासं
　　रणक्षोणिदक्षं भजे पिङ्गलाक्षम्॥ ७ ॥

महागर्भपीडां महोत्पातपीडां
　　महारोगपीडां महातीव्रपीडाम्।
हरत्याशु ते पादपद्मानुरक्तो
　　नमस्ते कपिश्रेष्ठ रामप्रियो यः॥ ८ ॥

सुधासिन्धुमुल्लङ्घ्य नाथोग्र दीप्तः
　　सुधाचौषदीस्ताः प्रगुप्तप्रभावम्।
क्षणद्रोणशैलस्य सारेण सेतुं
　　विना भूःस्वयं कस्समर्थः कपीन्द्रः॥ ९ ॥

निरातङ्कमाविश्य लङ्कां विशङ्को
　　भवानेन सीतातिशोकापहारी।
समुद्रान्तरङ्गादि रौद्रं विनिद्रं
　　विलङ्घ्योरु जङ्घस्तुताऽमर्त्यसङ्घः॥ १० ॥

रमानाथ रामः क्षमानाथ रामः
　　अशोकेन शोकं विहाय प्रहर्षम्।
वनान्तर्घनं जीवनं दानवानां
　　विपाट्य प्रहर्षात् हनूमत् त्वमेव॥ ११ ॥

जराभारतो भूरिपीडां शरीरे
　　निराधारणारूढ गाढ प्रतापे।
भवत्पादभक्तिं भवद्भक्तिरक्तिं
　　कुरु श्रीहनूमत्प्रभो मे दयालो॥ १२ ॥

www.prapatti.com

महायोगिनो ब्रह्मरुद्रादयो वा
न जानन्ति तत्त्वं निजं राघवस्य।
कथं ज्ञायते मादृशे नित्यमेव
प्रसीद प्रभो वानरेन्द्रो नमस्ते॥ १३ ॥

नमस्ते महासत्त्ववाहाय तुभ्यं
नमस्ते महावज्र देहाय तुभ्यम्।
नमस्ते परीभूत सूर्याय तुभ्यं
नमस्ते कृतामर्त्य कार्याय तुभ्यम्॥ १४ ॥

नमस्ते सदा ब्रह्मचर्याय तुभ्यं
नमस्ते सदा वायुपुत्राय तुभ्यम्।
नमस्ते सदा पिङ्गलाक्षाय तुभ्यं
नमस्ते सदा रामभक्ताय तुभ्यम्॥ १५ ॥

हनूमद्भुजङ्गप्रयातं प्रभाते
प्रदोषेऽपि वा चार्धरात्रेऽप्यमर्त्यः।
पठन्नश्नतोऽपि प्रमुक्ताघजालं
सदा सर्वदा रामभक्तिं प्रयाति॥ १६ ॥

॥ इति श्री हनुमद्भुजङ्गप्रयात स्तोत्रं सम्पूर्णम्॥

www.prapatti.com